# ॥ श्री परिज्ञानाश्रम त्रयोदशी ॥

Shrī Parijñānāshram Trayodashī

आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।

आनन्दाश्रमिणं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १ ॥

Ānandāshramashishyāgryaṁ swānandāmbudhimajjitam

Ānandāshramiṇaṁ vande Parijñānāshramaṁ Gurum ॥ 1 ॥

श्रीविद्योपासनोद्याने मायूरं विभ्रमं सदा ।

यश्चक्रे तं नुमो नित्यं परिज्ञानाश्रमं गुरुम् ॥ २ ॥

Shrīvidyopāsanodyāne māyūraṁ vibhramaṁ sadā

Yashchakre taṁ numo nityaṁ Parijñānāshramaṁ Gurum ॥ 2 ॥

बाल्ये दीपनमस्कारे यस्य वैराग्यधीशिखा ।

जज्वाल तं सदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ३ ॥

Bālye dīpanamaskāre yasya vairāgyadhīshikhā

Jajjwāla taṁ sadā vande Parijñānāshramaṁ Gurum ॥ 3 ॥

शिष्यान्तश्शोधने यद्वत्तद्वद्यन्त्रालिशोधने ।

कौतुकं यस्य तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ४ ॥

Shishyāntashshodhane yadvattadvadyantrālishodhane

© Shrī Chitrāpur Math. All rights reserved
Published by Shrī Chitrāpur Math - Shirālī, Uttara Kannaḍa, Karnāṭaka, India 581354
www.chitrapurmath.net

Kautukaṁ yasya taṁ vande Parijñānāshramaṁ Gurum ॥4॥

भवरोगहरो योऽभूच्छिवयोगपरोऽनिशम् ।

तं वन्दे सिद्धिसम्पन्नं परिज्ञानाश्रमं गुरुम् ॥५॥

Bhavarogaharo yo’bhūchchivayogaparo’nisham

Taṁ vande siddhisampannaṁ Parijñānāshramaṁ Gurum ॥5॥

शुनि चैव समद्रष्टा ज्ञानीत्यागमदृष्टये ।

आसीद्यस्तं नुमो हार्दं परिज्ञानाश्रमं गुरुम् ॥६॥

Shuni chaiva samadrashṭā jñānītyāgamadṛshṭaye

Āsīdyastaṁ numo hārdaṁ Parijñānāshramaṁ Gurum ॥6॥

सारस्वतजनप्रीतस्सारस्वतसमर्चकः ।

य आसीत् तं मुदा वन्दे परिज्ञानाश्रमं गुरुम् ॥७॥

Sāraswatajanaprītassāraswatasamarchakaḥ

Ya āsīt taṁ mudā vande Parijñānāshramaṁ Gurum ॥7॥

विद्यावृद्धस्तपोवृद्धो वयोवृद्धाश्रयोबभौ ।

यः कारुण्येन तं वन्दे परिज्ञानाश्रमं गुरुम् ॥८॥

Vidyāvṛddhastapovṛddho vayovṛddhāshrayo babhau

Yaḥ kāruṇyena taṁ vande Parijñānāshramaṁ Gurum ॥8॥

© Shrī Chitrāpur Math. All rights reserved
Published by Shrī Chitrāpur Math - Shirālī, Uttara Kannaḍa, Karnāṭaka, India 581354
www.chitrapurmath.net

योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।

वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥९॥

Yo'nukartuṁ vibhuṁ chakre vishwavastwālayaṅkaram

Vastwāgāraṁ numastaṁ Shrī Parijñānāshramaṁ Gurum ॥9॥

निर्मिमे निर्ममेन्द्रो यस्स्तवान् वेदान्तवासितान् ।

गीतासक्तं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥१०॥

Nirmime nirmamendro yasstavān vedāntavāsitān

Gītāsaktaṁ numastaṁ Shrī Parijñānāshramaṁ Gurum ॥10॥

कैवल्यसन्निकर्षत्वे तथाऽहङ्ग्रहचिन्तने ।

यस्यासीद्धृदयं वन्दे परिज्ञानाश्रमं गुरुम् ॥११॥

Kaivalyasannikarshatwe tathā'haṅgrahachintane

Yasyāsīdhṛdayaṁ vande Parijñānāshramaṁ Gurum ॥11॥

भक्तचेतोरथाध्यक्षो रथयात्रां महेशितुः ।

यश्चक्रे तं नुमोऽजस्रं परिज्ञानाश्रमं गुरुम् ॥१२॥

Bhaktachetorathādhyaksho rathayātrāṁ maheshituḥ

Yashchakre taṁ numo'jasraṁ Parijñānāshramaṁ Gurum ॥12॥

दुर्गं निर्माय दुर्गायै स्वसर्गं यो रुरोध तम् ।

© Shrī Chitrāpur Math. All rights reserved
Published by Shrī Chitrāpur Math - Shirālī, Uttara Kannaḍa, Karnāṭaka, India 581354
www.chitrapurmath.net

अपवर्गपदं वन्दे परिज्ञानाश्रमं गुरुम्

अपवर्गप्रदं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १३ ॥

Durgaṁ nirmāya Durgāyai swasargaṁ yo rurodha tam

Apavargapadaṁ vande Parijñānāshramaṁ Gurum

Apavargapradaṁ vande Parijñānāshramaṁ Gurum ॥ 13 ॥

श्री श्री परिज्ञानाश्रमयतीश्वराणां

तुर्याश्रमालङ्कृतिरूपकाणाम् ।

स्तोत्रं पठेद्यः प्रयतः प्रणम्रः

प्राप्नोति पूर्णां करुणां गुरूणाम् ॥ ॥ १४ ॥

Shrī Shrī Parijñānāshramayatīshwarāṇāṁ

Turyāshramālaṅkṛtirūpakāṇām

Stotraṁ pat͟hedyaḥ prayataḥ praṇamraḥ

Prāpnoti pūrṇāṁ karuṇāṁ Gurūṇām ॥ 14 ॥

© Shrī Chitrāpur Mat͟h. All rights reserved
Published by Shrī Chitrāpur Mat͟h - Shirālī, Uttara Kannaḍa, Karnāṭaka, India 581354
www.chitrapurmath.net